गगनरसमितं ६० कोणगाः सौम्यखेटाः ॥ कोटे लग्ने सुरेज्ये यदि भवति तदा खाष्ट ८०तुल्यं लग्नेशे धर्म्माङ्के-वाङ्गनाथे निधनभवनगे क्रूरदृष्टेऽम्बुहस्ताः २४ । लग्नाधीशाष्टनाथौ लयभवनगतौ सप्तविंशत् २७ विलग्ने क्रूरेज्यौ चन्द्रदृष्टौ यदि निधनगतः कश्चनास्ते द्विपक्षाः २२॥ लग्ने दृक् क्रूरहीनौ वपुषि सुरगुरौ रन्ध्रभं खेटहीनं केन्द्रे सौम्ये खशैलाः ७० सितविबुधगुरू स्याच्छतं १०० केन्द्रगौ चेत् । वागीशे कर्कलग्ने शतमिह भृगुजे केन्द्रगेऽथार्कसूनौ धर्माङ्कस्थे सुधांशौ व्ययनवमगते हायनानां शतं स्यात् ॥ धीकेन्द्रायुर्नवस्था यदि खलखचरा नो गुरोर्भे विलग्ने केन्द्रे काव्ये गुरौ वा शतमथ निधनं सौम्यदृष्टं शतं स्यात् । लग्नादिन्दोर्न खेटा यदि निधनगता वीर्य्यभाजौ सितेज्यौ पूर्णायुः स्वीयराशौ शुभगगनचराः षष्टिरङ्गोच्चगेज्ये ॥ कोदण्डान्त्यार्द्धमङ्गं यदि सकलखगाः स्वोच्चगा वा निजांशे गोस्थे पूर्णे च केन्द्रे सुरगुरुभृगुजौ लाभगेऽब्जे परायुः । शुक्रे नीचे तनुस्थे निधनपदगते सौम्यदृष्टे सुधांशौ जीवः केन्द्रे शतं स्यादथ तनुगृहपश्चिद्रगः पुष्करेऽब्जे ॥ वागीशोवीर्य्ययुक्तो नवमभवनगाः सर्वखेटाःशतायुः कर्कोऽङ्के चन्द्रजीवौ सहजरिपुभगे स्यात् कविज्ञौ च केन्द्रे । केन्द्रे सूर्य्यारमन्दागुरुनवलवगा वाक्पतौ लग्नयाते व्यष्टस्थानेषु शेषाः शरगज ८५ कलितं स्यान्नराणां तदायुः ॥ क्रूराः सौम्यांशयाता उपचयगृहगाः ३,६,१०,११, कातराः कण्टक १,४,७,१०स्थाः सौम्या व्योमार्कसङ्ख्य १२०यदि तपनकुजौ रन्ध्रगौ नो परायुः । केन्द्रे लग्ने शजीवौ नवसुतनिलये कण्टके१४,७१०,नो खलाख्याःसम्पूर्णं पापखेटायदि गुरुलवगा जीवभागे च सौम्याः॥युग्मर्क्षांशे गता वा व्ययधनगृहगास्ते च्छुभाः शीतभानुः सम्पूर्णो लग्नयायी शतमिह हि नृणामिन्दिरामन्दिरं स्यात्। लग्नेशः सौम्ययुक्तो वपुषि च लयपो रन्ध्रगो नान्यदृष्टो विंशत् केन्द्रे लग्नेशे बलवियुजि तथा लग्नपे त्रिंशदायुः॥ इन्द्रावापोक्लिमस्थे ३,६,९,१२, तदनु तनुपतौ निर्बले पापदृष्टे दन्तैस्तुल्यं ३२ ततोऽर्कोऽशुभखगविवरैलग्नतोऽशान्त्रिसंख्यम्।रिप्फेकेन्द्रे सुरेज्ये गुरुरिपुसहजे स्यात् स पापोऽङ्गनाथो रामाब्दं कर्कलग्ने कुजतुहिनकरौ केन्द्ररन्ध्रे ग्रहो न॥ रामाब्दं ३स्याल्लयेशो वपुषि च निधनं सौम्यहीनं खवेदाः ४०लग्ने शोरन्ध्रयातो वपुषि निधनपः स्यान्नृणां वाणसंख्यम्५ । नक्रे तिग्मांशुमन्दौ सहजरिपुगतौ कण्टके१,४,७,१०रन्ध्रनाथः पारावाराब्धिसंख्यं ४४ तदनु शुभखगाः स्वांशगास्त्रिंशदायुः॥ अङ्केशे सौम्यदृष्टे यदि शुभविहगावीर्य्यवन्तस्तदानीम् यातः सौम्ये गणेऽब्जो गुणमुनिगणितं ७३ रन्ध्रगैर्मध्यमायुः । स्याच्चन्द्रादङ्कि पादैरथ तपनसुते द्व्यङ्गलग्नं प्रयाते रिप्फेशोवायुरीज्यौ यदि बलरहितं कङ्कपत्राख्यसंख्यम् ५५ ॥ कर्काङ्के चण्डधामा खलविहगयुतः पुष्करे ज्ञो द्विजेन्द्रो वागीशोऽनस्तयायी विशिखपवनयुक्७५ स्याच्चतुर्थांसदस्थः । सौम्यः पीयूषधामान्तिमतनुविलये संस्थितोऽसौ कवीज्यावेकर्क्षे पुष्कराख्यं ५० व्ययरिपुनिधने मूर्त्तिपश्चन्द्रयुक्तः ॥ मन्दांशे लग्ननाथो भुजगशरमितं ५८ स्यादथो सौम्यखेटा रन्ध्रे नो देहनाथो व्ययरिपुनिधने पापयुक् षष्टि ६०रायुः॥ राशीशोलग्ननाथो दिनमणिसहितो मृत्युगोवासवेज्यौ नो केन्द्रे षष्टिरायुर्व्वपुषि दिनकरः शत्रुभौमान्वितश्चेत् ॥ वागीशोहीनवीर्य्यो व्ययतनुजगते यामिनीशे खशैला ७० धर्मे सर्वैः परायुः खलखगलवगैः केन्द्रयातैरशीतिः ८० ॥ क्रूरैः क्रूरर्क्षयातैः शुभभवनगतैः सौम्यखेटैः सवीर्य्य लग्नेशे स्यात् परायुः सुतभवनगतैः षष्टिरायुर्नराणाम्॥ सारङ्गस्यान्त्यभागे यदि वपुषि गते चाद्यभागे च केन्द्रे सौम्याः खेटाः शतं स्याद्वसु ८ सहज ३सुखे ४स्याच्चिरायुः समस्ताः । लग्नात् प्रालेयधाम्नो निधनसदनपोरिप्फकेन्द्रेऽष्टविंशत् २८ केन्द्रे सौम्यग्रहीने यदि मृतिभवने कश्चिदास्ते खरामाः ३० ॥ चीणे प्रालेयभानौ यदि खलखचरो रन्ध्रगोरन्ध्र नेता केन्द्रस्थो लग्ननाथो निजबलरहितः खाश्वि २० तुल्यं तदायुः । सौम्यैरापोक्लिमस्थैर्दिनमणिजविधू वैरिरन्ध्रालयस्थौ तुल्यं कामाङ्कुशैः२२स्यादथ धनलयगौ रिप्फगौ पापखेटौ ॥ हीनौ खर्भानुना वा यदि हिममहसाकाशबाहु २० प्रमाणं केन्द्रस्थौ सूर्य्यमन्दो यदि वपुषि कुजः पुष्पवाणाङ्कुशः २५ स्यात् । शुक्रेज्यावङ्गयातौ तनयभवनगौ भानुपापावनायुर्जन्मेशः सार्कलग्ने खलखगसहितो वेक्षितः स्यादनायुः ॥ यत् सम्प्रोक्तं योगजातम्मुराणैर्होरापारावारपारप्रयातैः । तस्मादायुः सारमंशं गृहीत्वा पुंसामुक्तम्मुख्यभाजाम्मयेदम् ॥बलाबलविवेकेन पुनरागमयायिनाम् । सुमनोभिरिदं देश्यमायुर्धर्म्मादिशालिनाम्" ॥

"पापस्त्रिकोणकेन्द्रे सौम्याः षष्ठाष्टमव्ययगताः । सूर्य्योदये प्रसूतः सद्यः प्राणांस्त्यजति जन्तुः" । सूर्य्यरिष्टम् । "षष्ठेऽष्टमे च चन्द्रः सद्योमरणाय पापसंदृष्टः । अष्टाभिश्च शुभैर्दृष्टोवर्षैर्मिश्रैस्तदर्द्धेन" । चन्द्ररिष्टम् । "सुत